# काव्यप्रकाशानुसारेण ध्वनितत्त्वविवेचनम्

महानन्दतिमिल्सिना, विद्यावारिधि:
सहप्राध्यापकः : साहित्यम्
ने.सं.वि., पिण्डेश्वरविद्यापीठम्, धरानः,  नेपाल:
timsinamahananda@gmail.com
**DOI:** https://doi.org/10.3126/ss.v2i2.69307

## लेखसारः

*अस्मिन् लेखे मम्मटाचार्यविरचितस्य काव्यप्रकाशे कीदृशानि ध्वनिविषयकमतानि प्रस्तुतानि सन्तीति विषये समीक्षणं कृतमस्ति । अस्मिन् लेखे मम्मटप्रतिपादितानामविवक्षितवाच्य–विवक्षितान्यपरवाच्यध्वनिभेदानां पर्यवेक्षणं विहितमस्ति । व्याकरणस्य स्फोटसिद्धान्तादनुप्राणितो ध्वनिरानन्दवर्धनस्य मम्मटस्य च साहाय्येन काव्यस्यात्मतत्त्वेन निर्धारितः । ध्वनिविरोधिमतखण्डनक्रमे आनन्दवर्धनाभिनवगुप्तमम्मटादीनामतुलनीया भूमिका संलक्ष्यते । मम्मटेन विवक्षिताविवक्षित–संलक्ष्यासंलक्ष्य–रसभाव–शब्दार्थोभयशक्त्युद्भवादीनामाधारेण ध्वनेर्मूलत एकपञ्चाशद्भेदाः प्रदर्शिताः । अत्र ध्वनेः परम्पराप्रदर्शनपूर्वकमस्य समीक्षणं कृतमस्ति । गुणात्मिकायामनुसन्धानपद्धत्यामाधारितेऽस्मिननुसन्धाने* द्वितीयकस्रोतयुतानां सामग्रीणां संयोजनं वर्तते ।

**बीजशब्दाः** अलङ्कारः, ध्वनिसिद्धान्तः, रसः, वस्तु ।

## विषयपरिचयः

काव्यप्रकाशकर्ता मम्मटो वाग्देवतावतारो ध्वनिप्रस्थानपरमाचार्यश्चोच्यते । अयं काश्मिरनिवासी भोजराजात् परवर्ती च । अस्य समय एकादशशतकस्य चरमभागः । अनेन भरतमुनितः स्वकीयसमयं यावद् ये ये सिद्धान्तास्थापितास्तेषां गहनमध्ययनं कृत्वा नवीनरूपेण काव्यप्रकाशग्रन्थो निर्मितः । मम्मटेन शब्दव्यापारविचारादयोऽन्येऽपि ग्रन्थाः प्रणीताः परं काव्यप्रकाश एव परमादरमभजत । यावन्मम्मटस्योदयो नाजायत, तावत्काले ध्वनिविरोधिनां ग्रन्थाः अरचिषत, परं मम्मटेन ध्वनिविरोधिनस्तथाऽधिक्षिप्ता यथा पुनस्ते ध्वनिं विरोद्धुं साहसं नाकुर्वन् । अनेन प्राचीनपरम्परया प्रचलितानां काव्यलक्षण–प्रयोजन–शब्दशक्ति–गुण–दोष–रसालङ्काराणां विवेचनं कृतम्, तथैवानन्दवर्धनेन प्रस्थापितमभिनवगुप्तेन पोषितं ध्वनिसिद्धान्तमपि पुनर्जीवितं कृतम् । काव्यप्रकाशे दशसङ्ख्यका उल्लासाः, १४२ कारिकाः सन्ति । एवञ्चात्र कारिका–वृत्ति–उदाहरणैस्त्रयोंऽशा विद्यन्ते ।

दशमोल्लासगतपरिकरालङ्कारावधिर्मम्मटेन कृतः, तदग्रेतनभागश्च अल्लटनाम्ना विदुषा निर्माय योजित इति ज्ञायते। उक्तञ्च –

कृतोऽयं मम्मटाचार्यैर्ग्रन्थः परिकरावधिः।
प्रबन्धः पूरितः शेषो विधायाल्लटसूरिणा॥

अनेन कारिकाः कच्चित् भरतस्यापि गृहीताः शेषाः स्वयं रचिताः, वृत्तिस्तु स्वीया एव, उदाहरणानि परेषामदीयन्त।

## समस्याकथनम्

काव्यप्रकाशानुसारेण ध्वनितत्त्वविवेचनम् इत्यस्मिन् लेखे निम्नाङ्किते समस्ये समागतेस्तः –

क. प्राचीनानामाचार्याणां ध्वनिविषयकानि मतानि कीदृशानि ?

ख. काव्यप्रकाशे ध्वनितत्त्वस्य महत्ता कीदृशी ?

## उद्देश्यम्

अध्ययनमेतत् निम्नाङ्कितयो उद्देश्ययोः केन्द्रितमस्ति –

क. प्राचीनानामाचार्याणां ध्वनिविषयकमतप्रकाशनम्,

ख. काव्यप्रकाशानुसारेण ध्वनितत्त्वस्य विवेचनम्,

## अध्ययनविधिः

एतदध्ययनं गुणात्मिकायामनुसन्धानपद्धत्यामाधारितमस्ति। अत्र पुस्तकालयीयानां सामग्रीणां प्रयोगो विद्यते। पौरस्त्यकाव्यशास्त्रिभिर्विरचितानि ध्वनिसिद्धान्तसम्बद्धानि पुस्तकान्यप्यत्र सामग्रीरूपेण संयोजितानि विद्यन्ते। काव्यप्रकाशग्रन्थविषये ध्वनिविषये च लिखितानि पुस्तकानि, विचाराः, लेखाश्चात्र सङ्कलनं विधाय विश्लेषणं कृतमस्ति। सामग्रीणां व्याख्याविश्लेषणेऽत्र वर्णनात्मकस्य व्याख्यात्मकस्य च विधेः प्रयोगो विहितोऽस्ति।

## सीमा

अस्मिनध्ययनेकाव्यप्रकाशे प्रतिपादितस्य ध्वनितत्त्वस्य विवेचनं कृतं विद्यते। अत्र संलक्ष्यक्रमासंलक्ष्यक्रमव्यङ्ग्यध्वनीनां विश्लेषणं कृतमस्ति। अस्मिन् लेखे मम्मटपूर्ववर्तिभिर्विद्वद्भिः प्रतिपादितस्य ध्वनितत्त्वस्य विवेचनपूर्वकं मम्मटेन विवेचितध्वनिभेदानां समीक्षणं कृतं विद्यते। काव्यप्रकाशे प्रस्तुतानां सकलानामपि काव्यसिद्धान्तानामध्ययनं विधातुमसमर्थताप्रकाशनमेवास्य लेखस्य सीमा विद्यते।

## पूर्वकार्यसमीक्षा

काव्यशास्त्रे ध्वनितत्त्वस्य विषयमवलम्ब्य नैकविधमध्ययनमनुसन्धानं विहितमस्ति । एतानि पूर्वकार्याणि क्रमिकरूपेणात्र सङ्क्षेपेण प्रस्तूयते –

व्रजेन्द्रचन्द्रशर्ममिश्र 'काव्यप्रकाशः' (ई.१८४८) ग्रन्थस्य भूमिकाखण्डे 'भूमिका' इति शीर्षके मम्मटस्य तस्य काव्यप्रकाशग्रन्थस्य च विषये विश्लेषणं विदधाति । अत्रासौ कथयति – काव्यप्रकाशो हि ग्रन्थः सर्वेषु साहित्यालङ्कारग्रन्थेषु चूडामणित्वमुपगतो विभातितराम् । अस्य हि विद्वत्सर्वस्वभूतस्य ग्रन्थप्रवरस्याद्यावधिकालं बहुमान्यैर्गण्यविद्वद्भिरार्यैः सुविहिता नैकविधाष्टीका विद्यन्ते मुद्रिताः, भूतलेऽस्मिन् तत्प्रचारश्च विद्यते कोविदसंसारे प्राचुर्येण चेत्यादिना कथनेन नैकविधाभिस्टीकाभिर्ग्रन्थोऽयं विराजत इत्यस्य महत्तां प्रतिपादयति ।

वासुदेवशास्त्री–अभ्यंकरः 'काव्यप्रकाशः' (ई.१९९४) ग्रन्थस्य प्रस्तावनायामस्य ग्रन्थस्य गौरवं प्रस्तौति, यत् – श्रीमम्मटभट्टप्रणीतः काव्यप्रकाशो नामालङ्कारशास्त्रीयग्रन्थेषु महानिबन्धोऽन्यान्सर्वानतिशेते । नास्य तुलामन्यः कश्चनाधिरोहतीति सार्वजनीनमेव । अलङ्कारशास्त्रे चालङ्काराणां प्राधान्यात्प्राधान्येन व्यपदेशा भवन्तीति न्यायादलङ्कारशास्त्रमिति व्यपदेशः । काव्यस्य च याथार्थ्येनावबोधे सत्येव तत्फलीभूतयशोऽर्थकल्याणावाप्तिर्व्यवहारज्ञानमुपदेशलाभः परनिर्वृत्तिश्च जायते । स च याथार्थ्येनावबोधोऽस्मादेवालङ्कारशास्त्रात्संपद्यत इति तस्य याथार्थ्येनावबोधाय ध्वनिगुणीभूतव्यङ्ग्यादिभेदा दोषगुणालङ्काराश्च विस्तरेणात्र ग्रन्थकृता सम्यक्प्रतिपादिता । तेषु च तत्त्वतो ज्ञातेषु काव्यं करस्थितामलकवत्स्फुटतरं प्रकाशते । महावैयाकरणो मम्मट एकादशशतके स्वजनुषा काश्मीरदेशमलमकार्षीदिति ।

आचार्यविश्वेश्वरः'काव्यप्रकाशः' (ई.१९९८) ग्रन्थस्य भूमिकायाः 'ध्वनिसम्प्रदायः' इत्युपशीर्षके ध्वनिविषयकं तथ्यं प्रकाशयति – कालक्रमेण वक्रोक्तिसम्प्रदायस्यानन्तरं ध्वनिसम्प्रदायस्योदयो जातः । अस्य सम्प्रदायस्य संस्थापकः आनन्दवर्धनाचार्यो मन्यते । अस्य मते 'काव्यस्यात्मा ध्वनिः ।' सर्वेषु सम्प्रदायेषु ध्वनिसम्प्रदायः प्रबलः । अस्य विरोधेऽपि नैके ग्रन्था लिखिताः, परं तेषां विरोधेन ध्वनिसम्प्रदायोऽधिकं प्रकाशितः । ध्वनिसिद्धान्तस्य विरोधे वैयाकरणाः, साहित्यिकाः, मीमांसकाः, नैयायिकाश्च संलग्ना आसन् परमन्ते काव्यप्रकाशकारेण मम्मटेन प्रबलाभियुक्तिभिः ध्वनिविरोधिमतानां खण्डनं विधाय ध्वनिसिद्धान्तस्य पुनःस्थापना विहिता । अतोऽसौ ध्वनिप्रतिष्ठापकपरमाचार्यः कथ्यते ।

डा.रमेशचन्द्रशुक्लः'प्रबन्धरत्नाकरः' (ई.२०००) ग्रन्थस्य 'साहित्यशास्त्रम्' इत्युपशीर्षके ध्वनेर्विवेचनं विदधाति, यत् – रसो न वाच्यो भवति । काव्ये विभावानुभावसञ्चारिणामेव कथनं क्रियते । तेषां संयोगात् स प्रतीतिमायाति किं वा तस्य ध्वननमेव भवत्यत एव ध्वनिकारस्तं रस इति नोक्त्वा रसध्वनिरिति वदति । ध्वनिः क इत्यत्र स ब्रूते –

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥(१/१३)

तमर्थम् इत्येतदंशं ध्वन्यालोककारोऽधःस्थिताभ्यां श्लोकाभ्यां व्याचष्टे –

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत् तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ।। (१/४)

सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ।।(१/४)

यद्यपि ध्वनिशब्दस्यार्थो वाच्यातिशायि व्यङ्ग्यमित्येव सामान्यतः, परं व्युत्पत्तिभेदेन ध्वनिरित्येतत्पदं व्यञ्जके शब्दे, व्यञ्जकेऽर्थे, रसालङ्कारवस्तुरूपव्यञ्जनायां काव्ये च प्रयुज्यते । स चायं ध्वनिः साहित्यशास्त्रे लक्षणामूलाभिधामूलभेदेन द्विविधो वर्तते । लक्षणामूलो ध्वनिरपि अर्थान्तरसंक्रमितवाच्या- त्यन्ततिरस्कृतवाच्यभेदेन पुनर्द्विविधः । अयं लक्षणामूलध्वनिर्लक्षणामाश्रित्य प्रवर्तते । अभिधामूलध्वनिरपि असंलक्ष्यसंलक्ष्यक्रमभेदेन प्रथमं द्विविधः पुनश्च संलक्ष्यक्रमभेदो ध्वनिः शब्दशक्त्यर्थशक्त्युभयशक्त्युद्भवभेदेन त्रिविधः । वस्त्वलङ्कारगतत्वेन शब्दशक्त्युद्भवो ध्वनिर्द्विविधः, अर्थशक्त्युद्भवो ध्वनिश्च द्वादशविध इति ।

डा.राजवंश सहाय हीरा'संस्कृतसाहित्यकोशः' (ई.२००२) इति कोशस्य 'मम्मटः' शब्दस्यानुक्रमेऽस्य काव्यप्रकाशग्रन्थस्य विषये च चर्चां विदधाति – मम्मटः काव्यशास्त्रस्याप्रतिम आचार्यः । अस्य काव्यप्रकाशो युगप्रवर्तकः काव्यशास्त्रीयो ग्रन्थः । मम्मटः काश्मीरदेशीयस्य जैयटस्य पुत्रः । भारतीयकाव्यशास्त्रस्येतिहासे काव्यप्रकाशः समन्वयकारकग्रन्थरूपेण विराजते । अस्मिन् ग्रन्थे पूर्ववर्तिभिराचार्यैः स्थापितेषु कतिपयेषु सिद्धान्तेषु परिमार्जनं विधाय परिष्कृतं काव्यशास्त्रीयं स्वरूपं प्रस्तुतमस्ति । अत्र शब्दशक्ति–ध्वनि–रस–गुण–दोषालङ्कारादीनां तत्त्वानां मूल्याङ्कनपूर्वकं समीक्षणं कृतं विद्यते । मम्मटो ध्वनिवादी आचार्यः । अनेन ध्वनिविरोधिमतानां खण्डनं विधाय युक्तिपूर्वकं ध्वनितत्त्वस्य स्थापनं कृतम् । 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इत्यनेन काव्यलक्षणं प्रस्तुतम् ।

आचार्यरामचन्द्रमिश्रः'संस्कृतसाहित्येतिहासः' (ई.२०१०) इति पुस्तकस्य 'साहित्यशास्त्रम् अलङ्कारशास्त्रं वा' इति शीर्षके ध्वनिसम्प्रदायस्य विषये चर्चा कृता वर्तते । तेन प्रस्तुतं यत् – रसो न वाच्य इति साधयितुं प्रवर्तमान आचार्य आनन्दवर्धनो ध्वनेरावश्यकतामनुभूय ध्वनिसम्प्रदायं प्रवर्तितवान् । आनन्दवर्धनात्पूर्वं ध्वनेरभाववादः, लक्षणास्वरूपतावादः, अनिर्वाच्यतावादश्च प्रथते स्म । ध्वनिवादः सर्वाधिकव्यवस्थितरूपेण प्रचरित इति ।

आनन्दवर्धनाचार्यः'ध्वन्यालोकः' (ई.२०११) इति ग्रन्थे ध्वनिविरोधिमतप्रदर्शनं विधाय ध्वनितत्त्वस्यावश्यकतां प्रदर्शयति –

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व–
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये ।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ।। (१/१)

बुधैः काव्यतत्त्वविद्भिः, काव्यस्यात्मा ध्वनिरिति संज्ञितः, परम्परया यः समाम्नातपूर्वः सम्यक् आसमन्ताद् म्नातः प्रकटितः, तस्य सहृदयजनमनः प्रकाशमानस्याप्यभावमन्ये जगदुः । तदभाववादिनां चामी विकल्पाः संभवन्ति । तत्र केचिदाचक्षीरन्– शब्दार्थशरीरन्तावत्काव्यम् । तत्र च शब्दगताश्चारुत्वहेतवोऽनुप्रासादयः प्रसिद्धा एव । अर्थगताश्चोपमादयः वर्णसंघटनाधर्माश्च ये माधुर्यादयस्तेऽपि प्रतीयन्ते । तदनतिरिक्तवृत्तयो वृत्तयोऽपि याः कैश्चिदुपनागरिकाद्याः प्रकाशिताः, ता अपि गता श्रवणगोचरम् । रीतयश्च वैदर्भीप्रभृतयः । तद्यतिरिक्तः कोऽयं ध्वनिर्नामेति । अन्ये ब्रूयुः – नास्त्येव ध्वनिः । प्रसिद्धप्रस्थानव्यतिरेकिणः काव्यप्रकारस्य काव्यत्वहानेः । सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम् । न चोक्तप्रस्थानातिरेकिणो मार्गस्य तत्सम्भवति । न च तत्समतान्तःपातिनः सहृदयान् काँश्चित्परिकल्प्य तत्प्रसिद्ध्या ध्वनौ काव्यव्यपदेशः प्रवर्तितोऽपि सकलविद्वन्मनोग्राहितामवलम्बते । पुनरपरे तस्याभवमन्यथा कथयेयुः – न सम्भवत्येव ध्वनिर्नामापूर्वः कश्चित् । कामनीयकमनतिवर्तमानस्य तस्योक्तेष्वेव चारुत्वहेतुष्वन्तर्भावात् । तेषामन्यतमस्यैव वा अपूर्वसमाख्यामात्रकरणे यत्किञ्चन कथनं स्यात् ।

अभिनवगुप्तः‘ध्वन्यालोकः’ (ई.२०११) इति ग्रन्थस्य टीकायां ध्वन्यालोककारप्रतिपादितं मूलपाठं व्याख्यानपूर्वकं विस्तरेण प्रकाशयति । असौ ‘योऽर्थः सहृदयश्लाघ्यः...’ इति ध्वन्यालोकस्य द्वितीयकारिकां विवेचयति यत् – एवंविधेऽभिधेये प्रयोजने च स्थित इत्यर्थः । भूमिरिव भूमिका । यथा अपूर्वनिर्माणे चिकीर्षिते पूर्वं भूमिर्विरच्यते, तथा ध्वनिस्वरूपे प्रतीयमानाख्ये निरूपयितव्ये निर्विवादसिद्धवाच्याभिधानं भूमिः । तत्पृष्ठेऽधिकप्रतीयमानांशोल्लिङ्गनात् । वाच्येन समशीर्षिकया गणनं तस्याप्यपह्नवनीयत्वं प्रतिपादयितुमिति ।

## ध्वनितत्त्वस्य परम्परा

ध्वनिसिद्धान्तस्य प्रवर्तकः आनन्दवर्धनाचार्य एव । तत्पूर्वमपि अस्य विषये चर्चा आसीदिति अस्यैव काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः इत्युक्तिद्वारैव सिद्ध्यति । बुधैः इत्यनेन वैयाकरणैः इति सूच्यते । वैयाकरणाः स्फोटरूपेण ध्वनिं स्वीकुर्वन्ति । स च व्याकरणे शब्दमात्रे । तन्मतमनुसृत्यानन्दवर्धनाचार्येण ध्वन्यालोके ध्वनेश्चर्चा विस्तरेण विहिता । ध्वनिकारादानन्दवर्धनात् पूर्वं भामहोद्भटादिभिराचार्यैः स्वकीयेषु ग्रन्थेषु ध्वनेः गुणीभूतव्यङ्ग्यस्य च चर्चा नैव कृता परं समासोक्ति–अप्रस्तुतप्रशंसा–व्याजस्तुतिसदृशानामलङ्काराणां निरूपणे केनापि प्रकारेण गुणीभूतव्यङ्ग्यभेदानां निरूपणं कृतं विद्यते । अनन्तरं ध्वन्यालोकस्य टीकालेखनमाध्यमेनाभिनवगुप्ताचार्यः ध्वनिसिद्धान्तं सुदृढीकर्तुं समर्थो जातः । अनेन सूक्ष्मरूपेण विस्तरेण च ध्वनितत्त्वस्य विवेचनं कृतमस्ति । तदनु ध्वनिसिद्धान्तस्य विश्लेषकः समर्थकश्च आचार्य मम्मटः संलक्ष्यते । असौ काव्यप्रकाशे उल्लिखति यत् – इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथित । बुधै वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः । अन्यैरपि आचार्यैः प्राचीनकालादेव किमप्यलौकिकं प्रतीयमानं वस्तुध्वनिपदेन

ज्ञायते । तथापि ते विद्वासः ध्वनिसम्प्रदायस्थापनेऽसमर्था जाताः । पश्चात् आनन्दवर्धनाचार्य एव ध्वनिसम्प्रदायस्य स्थापनां कृतवान् ।

आनन्दवर्धनेन ध्वनितत्त्वं काव्यस्यात्मारूपेण स्वीकृतम् । ध्वनिवादिभिराचार्यैः ध्वनतीति ध्वनिः व्यञ्जके शब्दे, ध्वनति ध्वनयति वा ध्वनिरिति व्यञ्जकेऽर्थे, ध्वन्यतेऽनेन इति व्यञ्जनाव्यापारे, ध्वन्यते य इति ध्वनिः रसादिव्यङ्ग्यार्थे तथा ध्वन्यतेऽस्मिन्निति ध्वनिकाव्ये च ध्वनिशब्दः प्रयुक्तो दृश्यते । ध्वन्यालोककारः कथयति -

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥ (१/१३)

यदा शब्दार्थौ स्वं स्वमर्थं परित्यज्य प्रतीयमानार्थं प्रकटीकुरुतः स एव ध्वनिः । प्रतीयमानार्थविषये ध्वनिकारः कथयति –

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥ (१/४)

अङ्गनासु प्रत्यक्ष–अङ्गसंरचनातिरिक्तं विलक्षणं लावण्यं यथा शोभते तथैव कवीनां वाणीषु सामान्यशब्दार्थातिरिक्त-विलक्षण: काव्यसौन्दर्यरूप: प्रतीयमानार्थ: शोभते ।

वस्त्वलङ्काररसादिध्वनिप्रकारेष्वसौ रसध्वनिमेव काव्यस्यात्मातत्त्वं स्वीकरोति । । उल्लिखति च –

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥ (१/५)

ध्वनिसम्प्रदाये ध्वनेर्बहवो भेदा परिगणिताः सन्ति । ध्वन्यालोकलोचनकारः पञ्चत्रिंशदेव प्रमुखा ध्वनिभेदाः स्वीकरोति । परं मम्मटविश्वनाथाभ्यां तु एकपञ्चाशत् ध्वनिभेदाः प्रस्तुताः ।

संस्कृतसाहित्यपरम्परायां ध्वनिसम्प्रदायः सुपरिचितो विद्यते । सिद्धान्तरूपेण पश्चात् परिचितस्याप्यस्य ध्वनितत्त्वस्य प्रयोगो वैदिकसाहित्ये पौराणिकसाहित्ये च द्रष्टुं शक्यते । लौकिकसाहित्ये तु कवीनां कृतिष्वस्य ध्वनितत्त्वस्य प्रचुराणि उदाहरणानि प्राप्यन्त एव । काव्यशास्त्रज्ञैः विद्वद्भिरपि प्राचीनकालादेव नामान्तरेणास्य स्वरूपं स्वीकृतं दृश्यते । परं केचित् विद्वांसो ध्वनेः सत्ता न स्वीकुर्वन्ति स्म । एतेषां ध्वनिविरोधिनां मतानि ध्वनिसंस्थापनपरमाचार्येणानन्दवर्धनेन स्वकीये ध्वन्यालोके प्रस्तूय विस्तरेण खण्डितानि । तत्र ध्वनिविरोधिनां त्रिविधानि मतानि प्राप्यन्ते – अभाववादी, भाक्तवादी, अलक्षणीयतावादी च ।

ध्वनिविरोधिनां मतत्रयेषु अभाववादिन अपि त्रयः प्रकाराः सन्ति ।

**प्रथममतम्** –

शब्दार्थशरीरं तावत् काव्यम् । तत्र च शब्दगताश्चारुत्वहेतवोऽनुप्रासादयः प्रसिद्धा एव । अर्थगतश्चोपमादयो वर्णसङ्घटनाधर्माश्च ये माधुर्यादयस्तेऽपि प्रतीयन्ते । तदतिरिक्ता उपनागरिकाद्याश्च प्रकाशिता एव । रीतयो वैदर्भीत्यादयः सन्त्येव, तद्यतिरिक्तः कोऽयं ध्वनिर्नाम ?

ग्रन्थकारोऽस्य मतस्य खण्डनं करोति यत् – शब्दार्थमात्रं तु काव्यमेव न भवति। काव्यं तु सहृदयहृदयाह्लादकं भवितुमर्हति परं शब्दार्थमात्रं चित्रकाव्यं तु तादृशगुणविशिष्टं न भवति। गुणालङ्काररीतितत्त्वानि च काव्यस्य सामान्यरूपेण बाह्यशोभावर्धकानि। तान्यपि सहृदयहृदयमाकर्षयितुं नैव शक्नुवन्ति। ध्वनिस्तु वाच्यार्थभिन्नप्रतीयमानार्थरूपो भवति। यः सहृदयहृदयेऽलौकिकचमत्कारात्मकमानन्दमुत्पादयति।

**द्वितीयमतम्**

प्रसिद्धमार्गव्यतिरेकिणः काव्यप्रकारात् काव्यत्वहानिर्भवति। शब्दार्थमयत्वं काव्यमेव सहृदयहृदयानन्दमुत्पादयति। केनचित् स्वेच्छया सहृदयं परिकल्प्य काल्पनिकनवीनमतस्थापनं सर्वेषां विदुषां कृते न स्वीकारयोग्यम्, अतः ध्वनिर्नास्ति।

अस्य मतस्य खण्डनम्– ध्वनिस्तु केवलं 'काव्यस्यात्मा ध्वनिः' इति लक्षणकर्तरि एव न प्रसिद्धः। स तु प्राचीनकवीनां रामायणमहाभारतादिषु काव्येषु प्रसिद्धम्। अतः ध्वनितत्त्वमप्रसिद्धमिति कथनं स्वीकारयोग्यं न।

**तृतीयमतम्**

कोऽपि पदार्थो नास्ति। यदि ध्वनिः काव्यस्य चारुत्वोत्कर्षकश्चेत्तदा तस्य तु पूर्वोक्तेषु चारुत्वहेतुष्वन्तर्भावः। तेषामेव चारुत्वप्रकारस्य कस्यचित् नूतनः नाममात्रेण को लाभः ? अतः ध्वनिर्नास्ति।

तृतीयमतखण्डनम्– अभिधेयाभिधानमात्राश्रिते गुणालङ्कारादिमार्गे व्यङ्ग्यव्यञ्जकसमाश्रितेन प्रतिष्ठितस्य ध्वनेः कथमन्तर्भावः। वाच्यवाचकयुतेषु समासोक्तिदीपकादिष्वलङ्कारेषु ध्वनितत्त्वस्य स्पष्टमेव प्रतीतिर्भवति परं तत्र तु ध्वनेरन्तर्भावो न भवति, यतः – अर्थो गुणीकृतात्मा अर्थान्तरमभिव्यनक्ति स एव ध्वनिः। समासोक्त्यादिषु तु न तथा। तत्रार्थस्यैव प्राध्यान्यात्। अतस्तेषु ध्वनेर्नान्तर्भावः। उक्तञ्च ध्वनिकारेण –

व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः।
समासोक्त्यादयस्तत्र वाच्यालङ्कृतयः स्फुटाः।
व्यङ्ग्यस्य प्रतिभामात्रे वाच्यार्थानुगमेऽपि वा।
न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते।
तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ।
ध्वनेः स एव विषयो मन्तव्यः सङ्करोज्झितः॥ (१/१४)

**भाक्तवादिनो मतम्**

कतिपये विद्वांसो ध्वनिसंज्ञितं तत्त्वं गुणवृत्तिरूपेण स्वीकुर्वन्ति। यद्यपि ध्वनिं नामतः समुल्लिख्य गुणवृत्तिर्ध्वनि इति तु केनापि नोल्लिखितः, परं कतिपयैर्विद्वद्भिर्ध्वनिः गुणवृत्तिरूपेण स्वीकृतः। अस्य मतस्य निराकरणम् – ध्वनितत्त्वं भक्त्या नैकत्वं बिभर्ति भिन्नरूपत्वात्। यत्र वाच्यवाचकाभ्यामेव स्वमुख्यार्थभिन्नस्वार्थस्य प्रयोजनमुद्दिश्य द्योत्यते, तत्र व्यङ्ग्योत्कर्षयुते काव्ये ध्वनिर्भवति। लक्षणा तु गुणवृत्तिरेव। अतः लक्षणया ध्वनिर्न लक्ष्यते।

**अनिर्वचनीयतावादिनां मतम्**

केचिद्वाचां स्थितमविषये तत्त्वमूचुः' इत्यादिना कतिपये विद्वांसो ध्वनितत्त्वमनिर्वचनीयं मन्यन्ते। इदं मतमपि ग्रन्थकारः खण्डयति। मतमिदं काल्पनिकं सम्भावितं च सूच्यते। ध्वन्यालोकस्य तृतीयोद्योतेऽप्यस्य खण्डनं

प्राप्यते – 'अस्फुटस्फुरितं काव्यतत्त्वमेतद्यथोदितम् । अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः ।' ध्वनेः सामान्यविशेषलक्षणप्रतिपादितेऽपि अनाख्येयम् इति कथ्यते चेत् सर्वेषामेव वस्तूनाम् अनाख्येयत्वं सम्भवति । अतो ध्वनितत्त्वं सस्वरूपं सुप्रसिद्धं सर्वोत्कृष्टं चेति ।

तदा बहवो ध्वनिविरोधिन आचार्याः संलक्षिताः । भट्टनायकोऽपि ध्वनिविरोधी आचार्यः । अस्य ग्रन्थनाम हृदयदर्पणम् । ग्रन्थोऽयं नैवावाप्यते । अभिनवगुप्तेन भट्टनायकस्य ध्वनिविराधिमतानां खण्डनं कृतम् । असौ व्यञ्जनां नैव स्वीकरोति, परं रसास्वादनं तु स्वीकरोत्येव । अयं केवलमभिधैव स्वीकरोति । रसास्वादनक्रमेऽनेन भावकत्वभोजकत्वव्यापारौ स्वीकृतौ । व्यक्तिविवेककारो महिमभट्टोऽपि ध्वनिवादिभिः प्रतिपादितं प्रतीयमानमर्थमनुमानेनैव ज्ञायत इति कथयति । अयं व्यङ्ग्यव्यञ्जकभावस्य स्थाने लिङ्गलिङ्गीभावं स्वीकरोति । असावनुमाने एव प्रतीयमानमर्थमन्तर्भावयति । एवञ्चानन्दवर्धनेन काव्यस्यात्मा ध्वनिः स्वीकृते तस्य विरोधस्वरूपे कुन्तकेन वक्रोक्तिजीवितमिति ग्रन्थः प्रणीतः । अनेन सकला अपि ध्वनिप्रभेदा वक्रोक्तावेव समाविष्टाः । तथैव आचार्यः क्षेमेन्द्रोऽपि काव्यस्यात्मतत्त्वरूपेण ध्वनिर्न स्वीकरोति । असौ काव्यासौन्दर्याधायकानि गुणालङ्काररसादीनि सकलान्यपि तत्त्वानि औचित्य एवान्तर्भावयति ।

कविना मनोरथेनापि ध्वनिविरोधिविचारः प्रदर्शितः, अस्य मतं ध्वन्यालोककारेण प्रस्तुतम्, यत् –

यस्मिन्नस्ति न वस्तु किञ्चन मनः प्रह्लादि सालङ्कृति-
व्युत्पन्नै रचितं न चैव वचनैर्वक्रोक्तिशून्यं च यत् ।
काव्यं तद्ध्वनिना समन्वितमिति प्रीत्या प्रशंसन् जडो
नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः ॥

ध्वनिप्रस्थापनपरमाचार्येणानन्दवर्धनेनैतेषां ध्वनिविरोधिनां मतानां युक्तिपूर्वकं खण्डनं कृतम् । अनन्तरमाचार्यमम्मटेनापि काव्यशास्त्रे ध्वनितत्त्वस्य स्थापनायां महान् यत्नो विहितः ।

काव्यप्रकाशकारेण मम्मटेन ध्वनिकाव्यम् उत्तममध्यमाधमभेदेन त्रिधा विभज्यते । तदनु आचार्यविश्वनाथोऽपि मम्मटमतमनुसरति । परमसौ अधमकाव्यं न स्वीकरोति । उत्तममध्यमभेदेन स ध्वनिकाव्यं द्विधा विभजति । पण्डितराजजगन्नाथस्य मते तु ध्वनिकाव्यस्य चत्वारः प्रकाराः - उत्तमोत्तमोत्तममध्यमाधमञ्चेति । अस्योत्तमोत्तमकाव्यस्य लक्षणेन सह ध्वनिकारप्रस्तुतस्य ध्वनिकाव्यलक्षणे समानता संलक्ष्यते । मम्मटस्वीकृतं मध्यमकाव्यमस्य मते उत्तमकाव्यमस्ति ।

## काव्यप्रकाशानुसारेण ध्वनितत्त्वविवेचनम्

आनन्दवर्धनानन्तरं मम्मटेन ध्वनिविषये विस्तृतेन चर्चा विहिता । अनेन काव्यप्रकाशस्य प्रथमोल्लासे ध्वनिकाव्यस्य परिचयः प्रस्तुत -

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः । (१/४)

वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः, ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य ध्वनिः स्वीकृतः । अनेन ध्वनेरुदाहरणं प्रस्तुतं यत् –

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे !
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥ (१/२)

नायकानायनाय प्रेषितां तमुपभुज्य समागतां दूतीं प्रति स्नानकार्यप्रकाशनद्वारा सम्भोगं प्रकाशयन्त्या विदग्धोत्तमनायिकाया कथनद्वाराऽत्र तदन्तिकमेव रन्तुं गताऽसीति प्राधान्येनाऽधमपदेन व्यज्यते ।

**मम्मटानुसारेण ध्वनिभेदाः**

<table>
<tr><td rowspan="2">अविवक्षितवाच्यः<br>(लक्षणामूलः)</td><td colspan="4">अर्थान्तरसङ्क्रमितवाच्यः</td></tr>
<tr><td colspan="4">अत्यन्ततिरस्कृतवाच्यः</td></tr>
<tr><td rowspan="5">विवक्षितान्यपरवाच्यः<br>(अभिधामूलः)</td><td>असंलक्ष्यक्रमव्यङ्ग्यः</td><td colspan="3">रसः<br>भावः<br>रसाभासः<br>भावाभासादयः</td></tr>
<tr><td rowspan="4">संलक्ष्यक्रमव्यङ्ग्यः</td><td>शब्दशक्त्युद्भवः</td><td colspan="2">वस्तु<br>अलङ्कारः</td></tr>
<tr><td rowspan="3">अर्थशक्त्युद्भवः</td><td>स्वतःसम्भवी</td><td>- वस्तुना वस्तु<br>- वस्तुना लङ्कारः<br>- अलङ्कारेण वस्तु<br>-अलङ्कारेण अलङ्कारः</td></tr>
<tr><td>कविप्रौढोक्तिसिद्धः</td><td>- वस्तुना वस्तु<br>- वस्तुना लङ्कारः<br>- अलङ्कारेण वस्तु<br>-अलङ्कारेण अलङ्कारः</td></tr>
<tr><td>कविनिबद्धवक्तृ-<br>प्रौढोक्तिसिद्धः</td><td>- वस्तुना वस्तु<br>- वस्तुना लङ्कारः<br>- अलङ्कारेण वस्तु<br>-अलङ्कारेण अलङ्कारः</td></tr>
</table>

| | | | |
|---|---|---|---|
| | | उभयशक्त्युद्भवः | |

मम्मटेन काव्यस्य भेदद्वयं प्रदर्शितम् – अविवक्षितवाच्यं विवक्षितान्यपरवाच्यञ्च । तत्र अविवक्षितवाच्यं लक्षणामूलध्वनिरपि कथ्यते। अस्यापि भेदद्वयं संलक्ष्यते –

अविवक्षितवाक्यो यस्तत्र वाच्यं भवेद् ध्वनौ।

अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्॥ (४/२४)

अर्थान्तरसङ्क्रमितवाच्ये वाच्यं प्रकृतान्वयेऽनभिप्रेतत्वादर्थान्तरे परिणमति । 'त्वामस्मि वच्मि विदुषां....'(उदा.४/२३) इति श्लोके वचनादि उपदेशादिरूपतया परिणमति । एवञ्च प्रकृतान्वयानुपयोगितया इतरार्थमात्रलक्षके वाच्येऽत्यन्ततिरस्कृतवाच्यम्। 'उपकृतं बहु तत्र किमुच्यते...।' (उदा.४/२४) इत्युदाहरणेऽपकारिणं प्रति बाधितः सन् उपकृतम् अपकृतम्, सुजनता दुर्जनता, सखे शत्रो, सुखितं दुःखितमिति विपरीतं लक्षयति, अपकाराद्यतिशयो व्यङ्ग्यः।

तथैव विवक्षितान्यपरवाच्यम् अभिधामूलो वा ध्वनिः संलक्ष्यक्रमव्यङ्ग्योऽसंलक्ष्यक्रमव्यङ्ग्यभेदेन द्विविधः-

विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः।

कोऽप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः॥ (४/२५)

तत्रासंलक्ष्यक्रमव्यङ्ग्यो ध्वनिस्तु रसादिः । रसविभावाद् द्वयोः पौर्वापर्यक्रमोऽस्त्येव किन्तु रसोद्बोधेन झटिति चित्ताकर्षकणात् शतपत्रपत्रशतभेदनवत्तस्यज्ञानादित्युक्तमलक्ष्यक्रम इति। असंलक्ष्यक्रमव्यङ्ग्यस्य भेदा यथा –

रसभावतदाभासभावशान्त्यादिरक्रमः।

भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः॥(४/२६)

शृङ्गारादय रसाः, रत्यादयो भावाः, रसाभासाः, भावाभासाश्च, भावशान्तिः, भावोदयः, भावशवलता च असंलक्ष्यक्रमो व्यङ्ग्यः। यत्राङ्गभूतो रसादिस्तत्र गुणीभूतव्यङ्ग्ये रसवत्प्रेय–ऊर्जस्वि–समाहितादयोऽलङ्काराः। ते च गुणीभूतव्यङ्ग्यनाम्ना कथ्यन्ते। मम्मटः रसस्वरूपं प्रस्तौति यत् –

कारणान्यथ कार्याणि सहकारीणि यानि च

रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥

विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः

व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥

विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणै रत्यादिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः, व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतीनां मतम्।

एवञ्च सम्यक्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगन्यायेन नटे काव्यानुसन्धानबलाच्छिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटेन च नटेनैव प्रकाशितः कारणकार्यसहकारिभिः कृत्रिमैरपि तथाऽनभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगाद् गम्यगमकभावरूपाद् अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्भावस्तासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकस्य मतम् । तथैव न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते, अपि तु काव्ये नाट्ये नाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिः सतत्वेन भोगेन भुज्यते इति भट्टनायकस्य मतम् ।

एवमेव प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्यैः सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतिप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन् अन्यत्सर्वमिव तिरोदधत् ब्रह्मस्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः इत्यभिनवगुप्तस्य रसविषयकः सारः ।

## मम्मटानुसारेण रसभेदाः

मम्मटेनाष्टप्रकारकाः रसाः स्वीकृताः –

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ।। (४/२९)
रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ।। (४/२९)

| क्र.सं. | रसाः | स्थायिभावाः | क्र.सं. | रसाः | स्थायिभावाः |
|---|---|---|---|---|---|
| १. | शृङ्गारः | रतिः | ५. | वीरः | उत्साहः |
| २. | हास्यः | हासः | ६. | भयानकः | भयम् |
| ३. | करुणः | शोकः | ७. | बीभत्सः | जुगुप्सा |
| ४. | रौद्रः | क्रोधः | ८. | अद्भुतः | विस्मयः |

मम्मटेन अष्टरसविवेचनानन्तरं शान्तरसस्य भावादीनाञ्च चर्चा विहिता । तेनोक्तम् –

निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।

अनेन दृश्यकाव्यस्य कृतेऽष्टौ रसानां व्यवस्था कृता परं श्रव्यकाव्ये तु नवरसा एव भवन्तीति विचार्य शान्तोऽपि नवमो रस इत्युक्तः ।

रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः ।
भावः प्रोक्तस्तदाभासा अनौचित्यप्रवर्तिताः
भावस्य शान्तिरुयः सन्धिः शबलता तथा ॥ (४/२९)

एवञ्च देवादिविषया रतिः, आदिशब्देन मुनिगुरुनृतपुत्रादिविषया रतिर्बोध्यते, व्यङ्ग्यो व्यभिचारिभावश्च भावः कथ्यते । रसानां भावानाञ्चानौचित्येन प्रयोगात् रसाभासः, भावाभासश्च । तथैव भावस्य शान्तौ भावशान्तिः, भावस्योदये भावोदयः, भावयोः सन्धौ भावसन्धिः, भावानां शबलतायां भावशबलता च भवन्ति ।

'मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन ।' इत्युक्त्वा ग्रन्थकारेण भावशान्त्यादयो राजानुगतविवाहप्रवृत्तभृत्यवत् कदाचनाङ्गित्वं प्राप्नुवन्तीति प्रतिपादितम् । अनन्तरमसौ संलक्ष्यक्रमव्यङ्ग्यध्वनेर्भेदान् प्रस्तौति –

अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ।
शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः ॥ (४/३७)

वाद्यमानघण्टाशब्दप्रतीत्यनन्तरं यः प्रतिध्वनिस्तत्सदृशो व्यङ्ग्यस्य ज्ञेयः क्रमोऽसौ ध्वनिः शब्दशक्ति–अर्थशक्ति–उभयशक्तिभेदेन त्रिविधो विद्यते । तत्रापि शब्दशक्त्युद्भवो द्विविधः –

अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते ।
प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ॥ (४/३७)

शब्दशक्त्युद्भवध्वनौ उपमाद्यलङ्कारो वस्तुमात्रं वा शब्दात्परिवृत्त्यसहरूपात्पदात्प्रधानत्वेनावभासते । एवमेवार्थशक्त्युद्भवध्वनेः प्रकारान् प्रकाशयत्यसौ –

अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः सम्भवी स्वतः ।
प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोम्भितस्य वा ।
वस्तु वाऽलङ्कृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् ।
वस्त्वलङ्कारमथवा तेनायंद्वादशात्मकः ॥ (४/४०)

स्वतः सम्भवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन सम्भाव्यमानो भवति । कवेः प्रौढोक्तिमात्रात्सिद्धः लोकेऽदृष्टोऽपि कविप्रतिभामात्रेण कल्पितः, यथा कीर्त्यादेर्धावल्यादिः । तथैव कविनिबद्धस्य नायकादेः प्रौढोक्तिमात्रात्सिद्धस्तु कविनिबद्धवक्तृप्रौढोक्तिसिद्धः । एष त्रिविधो ध्वनिः वस्त्वलङ्काररूपेण षड्विधः । असौ षड्विधोऽपि वस्तुमात्रमथवाऽलङ्कारं व्यनक्ति, तेनाऽयमर्थशक्त्युद्भवो ध्वनिर्वादशविधः ।

शब्दार्थोभयशक्तिमूलस्त्वेक एव । अस्मिन् ध्वनौ प्राधान्येन व्यङ्ग्यार्थोपस्थापकपदानामंशविशेषे परिवृत्तिसहत्वासहत्वाभ्यां शब्दार्थोभयशक्तिमूलत्वं ध्येयम् । अविवक्षितवाच्यस्य भेदद्वयेन, असंलक्ष्यक्रमस्यैकेन

भेदेन, शब्दशक्त्युद्भवस्य भेदद्वयेन, उभयशक्त्युद्भवस्यैकेन, अर्थशक्त्युद्भवस्य द्वादशभेदेन च ध्वनेरष्टादशभेदाः सञ्जाताः ।

'रसादीनामनन्तत्वाद्भेद एको हि गण्यते ।' इत्युक्त्वानेन रसादीनामेको भेद एव परिगणितः, यतो हि शृङ्गारस्य द्वौ भेदौ सम्भोगविप्रलम्भश्च, सम्भोगस्यापि परस्परविलोकनाऽऽलिङ्गनचुम्बनादि-कुसुमोच्चय-जलकेलि-सूर्यास्तमय-चन्द्रोदय-षड्तुवर्णनादयो बहवो भेदाः, विप्रलम्भस्याभिलाषादयः, तेषामपि विभावानुभावव्यभिचारिवैचित्र्यं, तत्रापि नायकयोरुत्तममध्यमाधमप्रकृतित्वं तत्रापि देशकालावस्थादिभेद इत्येकस्यैव रसस्यानन्त्यम्, का गणना त्वन्येषाम् । अतः रसादिध्वनिभेद एक एव गण्यते ।

वाक्ये द्व्युत्थः पदेऽप्यन्ये प्रबन्धेऽप्यर्थशक्तिभूः ।
पदैकदेशरचनावर्णेष्वपि रसादयः ।
भेदास्तदेकपञ्चाशत् तेषां चान्योन्ययोजने ।
सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया ।
वेदखाब्धिवियच्चन्द्राः शरेषुयुगखेन्दवः ।। (४/४४)

शब्दार्थोभयशक्तिमूलो ध्वनिर्वाक्ये एव भवति । अन्येऽर्थान्तरसङ्क्रमितवाच्यादयः सप्तदशभेदा वाक्ये पदेऽपि भवन्ति । एवमत्र ध्वनेः पञ्चत्रिंशद् भेदाः सञ्जाताः । तदनु अर्थशक्तिमूलो द्वादशविधो ध्वनिर्न केवलं पदवाक्ययोरेव, किन्तु प्रबन्धेऽपि भवति । प्रबन्धश्च संघटितनानावाक्यसमुदायो ग्रन्थरूपस्तदवान्तरप्रकरणरूपश्च । महाभारतस्य गृध्रगोमायुसंवादे प्रबन्धमूलो ध्वनिर्व्यज्यते । प्रबन्धगतेन ध्वनिना सह संयोज्यात्र सप्तचत्वारिंशद् (४७) भेदाः जाताः । एवमेवासंलक्ष्यक्रमव्यङ्ग्यध्वनिः पदैकदेशेषु, रचनायाम्, वर्णेषु, अपि शब्दात् प्रबन्धेऽपि व्यज्यते । एते चत्वारो भेदाः संयोज्य ध्वनेरेकपञ्चाशद् भेदा (४७+४=५१)
जायन्ते । एकपञ्चाशतो भेदानां त्रिरूपेण सङ्करेण एकरूपया संसृष्ट्या च परस्परगुणने सति चतुरुत्तरचतुःशताधिकायुतपरिमिताः (१०४०४) भेदाः सम्पद्यन्ते । एषु ध्वनिभेदेषु प्रागुक्तैकपञ्चाशद्भेदैः संयोजने पञ्चपञ्चाशदुत्तरचतुःशताधिकायुतपरिमिताः (१०४५५) भेदा जायन्ते ।

## निष्कर्षः

साहित्यशास्त्रे ध्वनितत्त्वस्य स्थापनायामानन्दवद्र्धनस्येव मम्मटस्यापि महती भूमिका वर्तते । ध्वनिर्व्यङ्ग्यव्यञ्जकसमाश्रयेण काव्ये विराजते । वाच्यवाचकचारुत्वहेतवस्त्वस्याङ्गभूता एव । उत्तमकाव्यपरीक्षायां ध्वनिरेव सहृदयहृदयाह्लादने समर्थः । ध्वनिरभिधामूलो लक्षणामूलश्च, एषः केवलमभिधेयार्थस्य केवलं लक्ष्यार्थस्य च विषयो न । प्रतीयमानमर्थमेव ध्वनितत्त्वं सङ्केतयति । काव्ये चमत्कारमानन्दञ्चोत्पादयितुं ध्वनिरेव समर्थः । आनन्दवर्धनमम्मटजगन्नाथादयः ध्वनितत्त्वमेव काव्यस्यात्मारूपेणाङ्गीकृतम् । ध्वनिकाव्यमुत्तमकाव्यं कथ्यते । पौरस्त्यकाव्यशास्त्रपरम्परायां ध्वनिसिद्धान्तः सर्वमान्योऽस्ति । आनन्दवर्धनादारभ्य अद्यावधिपर्यन्तं

ध्वनितत्त्वमविच्छिनरूपेण सहृदयमनसि ब्रह्मानन्दसहोदरमानन्दमुत्पादयन् विलसति । मम्मटेनाविवक्षितवाच्य-विवक्षितान्यपरवाच्यरूपेण प्रथमं ध्वनिर्द्विधा विभक्तः । अनन्तरं विवक्षितान्यपरवाच्यस्यासंलक्ष्यक्रमसंलक्ष्यक्रमेण विभाजितः । असंलक्ष्यक्रमे रसभावादयोऽन्तर्भाविताः, संलक्ष्यक्रमे च शब्दार्थोभयशक्त्युद्भवध्वनयः प्रकाशिताः । अनेन प्राधान्येनैकपञ्चाशद् ध्वनिभेदाः प्रदर्शिताः । आचार्येण मम्मटेन काव्यप्रकाशग्रन्थे व्यवस्थितरूपेण वैज्ञानिकपद्धत्या च ध्वनेर्विवेचनं वर्गीकरणञ्च कृतं विलोक्यते ।

## सन्दर्भसामग्रीसूची


आचार्य, बलदेव उपाध्याय (ई.१९९२) *संस्कृत साहित्यका इतिहास* (दशम सं.), शारदा निकेतन ।

आचार्य, रामचन्द्र मिश्रः (ई.२०१०) *संस्कृतसाहित्येतिहासः*, चौखम्बाविद्याभवन ।

आनन्दवर्धन (ई.२००६), *ध्वन्यालोकः*, चौखम्बा संस्कृत सिरिज अफिस ।

मम्मटः (ई.१९९८), *काव्यप्रकाशः* (व्याख्या : आचार्य विश्वेश्वर), ज्ञानमण्डल लिमिटेड ।

-------(ई.१९९७), *काव्यप्रकाशः* (व्याख्या : डा.ज्योत्स्ना मोहन), नाग प्रकाशक ।

------- (ई.१९९४), *काव्यप्रकाशः* (द्वि.सं.), (व्याख्या - वासुदेव शास्त्री अभ्यंकर), चौखम्बा विद्याभवन ।

-------(ई.१८४८), *काव्यप्रकाशः* (व्याख्या : व्रजेन्द्रचन्द्रशर्ममिश्र) चौखम्बा संस्कृत भवन ।

राजवंश सहाय 'हीरा' (ई.२००२), *संस्कृत साहित्य-कोश* (च.सं.), चौखम्बा विद्याभवन ।

विश्वनाथः (ई.१९९५), *साहित्यदर्पणः* (पञ्चम सं.), कृष्णदास अकादमी ।

शुक्लः, रमेशचन्द्रः (वि.सं.२०२३), *प्रबन्धरत्नाकरः,* चौखम्बा विद्याभवन ।